# Varaha Upanishad

# વરાહોપનિષત્

## Document Information

Text title : Varaha Upanishad

File name : varaha.itx

Category : upanishhat, dashAvatAra

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 98 / 108; Krishna Yajurveda - Yoga upanishad

Latest update : Sept. 4, 2000, December 14, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# વરાહોપનિષત્

શ્રીમદ્વારાહોપનિષદ્વેદ્યાખણ્ડસુખાકૃતિ ।
ત્રિપાન્નારાયણાખ્યં તદ્રામચન્દ્રપદં ભજે ॥

ૐ સહ નાવવતુ સહ નૌ ભુનક્તુ સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધી તમસ્તુ મા વિદ્વિષાવહૈ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ અથ ઋભુર્વૈ મહામુનિર્દેવમાનેન દ્વાદશવત્સરં
તપશ્ચચાર । તદવસાને વરાહરૂપી ભગવાન્પ્રાદુરભૂત્ ।
સ હોવાચોત્તિષ્ઠોત્તિષ્ઠ વરં વૃણીશ્વેતિ । સોદતિષ્ઠત્ ।
તસ્મૈ નમસ્કૃત્યોવાચ ભગવન્કામિભિર્યદ્યત્કામિતં
તત્તત્ત્વત્સકાશાત્સ્વપ્નેઽપિ ન યાચે । સમસ્તવેદશાસ્ત્રેતિહાસપુરાણાનિ
સમસ્તવિદ્યાજાલાનિ બ્રહ્માદયઃ સુરાઃ સર્વે ત્વદ્રૂપજ્ઞાનાન્મુક્તિમાહુઃ ।
અતસ્ત્વદ્રૂપપ્રતિપાદિકાં બ્રહ્મવિદ્યાં બ્રૂહીતિ હોવાચ । તથેતિ સ હોવાચ
વરાહરૂપી ભગવાન્ । ચતુર્વિંશતિતત્ત્વાનિ કેચિદિચ્છન્તિ વાદિનઃ ।
કેચિત્ષટ્ત્રિંશત્તત્ત્વાનિ કેચિત્ષણ્ણવતીનિ ચ ॥ ૧॥

તેષાં ક્રમં પ્રવક્ષ્યામિ સાવધાનમનાઃ શ‍ૃણુ ।
જ્ઞાનેન્દ્રિયાણિ પઞ્ચૈવ શ્રોત્રત્વગ્લોચનાદયઃ ॥ ૨॥

કર્મેન્દ્રિયાણિ પઞ્ચૈવ વાક્પાણ્યઙ્ઘ્ર્યાદયઃ ક્રમાત્ ।
પ્રાણાદતસ્તુ પઞ્ચૈવ પઞ્ચ શબ્દાદયસ્તથા ॥ ૩॥

મનોબુદ્ધિરહઙ્કારશ્ચિત્તં ચેતિ ચતુષ્ટયમ્ ।
ચતુર્વિંશતિતત્ત્વાનિ તાનિ બ્રહ્મવિદો વિદુઃ ॥ ૪॥

એતૈસ્તત્ત્વૈઃ સમં પઞ્ચીકૃતભૂતાનિ પઞ્ચ ચ ।
પૃથિવ્યાપસ્તથા તેજો વાયુરાકાશમેવ ચ ॥ ૫॥

દેહત્રયં સ્થૂલસૂક્ષ્મકારણાનિ વિદુર્બુધાઃ ।

અવસ્થાત્રિતયં ચૈવ જાગ્રત્સ્વપ્નસુષુપ્તયઃ ॥ ૬॥

આહત્ય તત્ત્વજાતાનાં ષટ્ત્રિંશન્મુનયો વિદુઃ ।
પૂર્વોક્તૈસ્તત્ત્વજાતૈસ્તુ સમં તત્ત્વાનિ યોજયેત્ ॥ ૭॥

ષડ્ભાવવિકૃતિશ્ચાસ્તિ જાયતે વર્ધતેઽપિ ચ ।
પરિણામં ક્ષયં નાશં ષડ્ભાવવિકૃતિં વિદુઃ ॥ ૮॥

અશના ચ પિપાસા ચ શોકમોહૌ જરા મૃતિઃ ।
એતે ષડૂર્મયઃ પ્રોક્તાઃ ષટ્કોશાનથ વચ્મિ તે ॥ ૯॥

ત્વક્ચ રક્તં માંસમેદોમજ્જાસ્થીનિ નિબોધત ।
કામક્રોધૌ લોભમોહૌ મદો માત્સર્યમેવ ચ ॥ ૧૦॥

એતેઽરિષડ્વા વિશ્વશ્ચ તૈજસઃ પ્રાજ્ઞ એવ ચ ।
જીવત્રયં સત્ત્વરજસ્તમાંસિ ચ ગુણત્રયમ્ ॥ ૧૧॥

પ્રારબ્ધાગામ્યર્જિતાનિ કર્મત્રયમિતીરિતમ્ ।
વચનાદાનગમનવિસર્ગાનન્દપઞ્ચકમ્ ॥ ૧૨॥

સઙ્કલ્પોઽધ્યવસાયશ્ચ અભિમાનોઽવધારણા ।
મુદિતા કરુણા મૈત્રી ઉપેક્ષા ચ ચતુષ્ટયમ્ ॥ ૧૩॥

દિગ્વાતાર્કપ્રચેતોઽશ્વિવહ્નીન્દ્રોપેન્દ્રમૃત્યુકાઃ ।
તથા ચન્દ્રશ્ચતુર્વક્ત્રો રુદ્રઃ ક્ષેત્રજ્ઞ ઈશ્વરઃ ॥ ૧૪॥

આહત્ય તત્ત્વજાતાનાં ષણ્ણવત્યસ્તુ કીર્તિતાઃ ।
પૂર્વોક્તતત્ત્વજાતાનાં વૈલક્ષણ્યમનામયમ્ ॥ ૧૫॥

વરાહરૂપિણં માં યે ભજન્તિ મયિ ભક્તિતઃ ।
વિમુક્તાજ્ઞાનતત્કાર્યા જીવન્મુક્તા ભવન્તિ તે ॥ ૧૬॥

યે ષણ્ણવતિતત્ત્વજ્ઞા યત્ર કુત્રાશ્રમે રતાઃ ।
જટી મુણ્ડી શિખી વાપિ મુચ્યતે નાત્ર સંશયઃ ॥ ૧૭॥ ઇતિ॥

ઇતિ પ્રથમોઽધ્યાયઃ ॥ ૧॥

ઋભુર્નામ મહાયોગી ક્રોડરૂપં રમાપતિમ્ ।
વરિષ્ઠાં બ્રહ્મવિદ્યાં ત્વમધીહિ ભગવન્મમ ।
એવં સ પૃષ્ટો ભગવાન્પ્રાહ ભક્તાર્તિભઞ્જનઃ ॥ ૧॥

સ્વવર્ણાશ્રમધર્મેણ તપસા ગુરુતોષણાત્ ।
સાધનં પ્રભવેત્પુંસાં વૈરાગ્યાદિચતુષ્ટયમ્ ॥ ૨॥

નિત્યાનિત્યવિવેકશ્ચ ઇહામુત્ર વિરાગતા ।
શમાદિષટ્કસમ્પત્તિર્મુમુક્ષા તાં સમભ્યસેત્ ॥ ૩॥

એવં જિતેન્દ્રિયો ભૂત્વા સર્વત્ર મમતામતિમ્ ।
વિહાય સાક્ષિચૈતન્યે મયિ કુર્યાદહંમતિમ્ ॥ ૪॥

દુર્લભં પ્રાપ્ય માનુષ્યં તત્રાપિ નરવિગ્રહમ્ ।
બ્રાહ્મણ્યં ચ મહાવિષ્ણોર્વેદાન્તશ્રવણાદિના ॥ ૫॥

અતિવર્ણાશ્રમં રૂપં સચ્ચિદાનન્દલક્ષણમ્ ।
યો ન જાનાતિ સોઽવિદ્વાન્કદા મુક્તો ભવિષ્યતિ ॥ ૬॥

અહમેવ સુખં નાન્યદન્યચ્ચેન્નૈવ તત્સુખમ્ ।
અમદર્થં ન હિ પ્રેયો મદર્થં ન સ્વતઃપ્રિયમ્ ॥ ૭॥

પરપ્રેમાસ્પદતયા મા ન ભૂવમહં સદા ।
ભૂયાસમિતિ યો દ્રષ્ટા સોઽહં વિષ્ણુર્મુનીશ્વર ॥ ૮॥

ન પ્રકાશોઽહમિત્યુક્તિર્યત્પ્રકાશૈકબન્ધના ।
સ્વપ્રકાશં તમાત્માનમપ્રકાશઃ કથં સ્પૃશેત્ ॥ ૯॥

સ્વયં ભાતં નિરાધારં યે જાનન્તિ સુનિશ્ચિતમ્ ।
તે હિ વિજ્ઞાનસમ્પન્ના ઇતિ મે નિશ્ચિતા મતિઃ ॥ ૧૦॥

સ્વપૂર્ણાત્માતિરેકેણ જગજ્જીવેશ્વરાદયઃ ।
ન સન્તિ નાસ્તિ માયા ચ તેભ્યશ્ચાહં વિલક્ષણઃ ॥ ૧૧॥

અજ્ઞાનાન્ધતમોરૂપં કર્મધર્માદિલક્ષણમ્ ।
સ્વયંપ્રકાશમાત્માનં નૈવ માં સ્પ્રષ્ટુમાર્હતિ ॥ ૧૨॥

સર્વસાક્ષિણમાત્માનં વર્ણાશ્રમવિવર્જિતમ્ ।
બ્રહ્મરૂપતયા પશ્યન્બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૧૩॥

ભાસમાનમિદં સર્વં માનરૂપં પરં પદમ્ ।
પશ્યન્વેદાન્તમાનેન સદ્ય એવ વિમુચ્યતે ॥ ૧૪॥

દેહાત્મજ્ઞાનવજ્જ્ઞાનં દેહાત્મજ્ઞાનબાધકમ્ ।
આત્મન્યેવ ભવેદ્યસ્ય સ નેચ્છન્નપિ મુચ્યતે ॥ ૧૫॥

સત્યજ્ઞાનાનન્દપૂર્ણલક્ષણં તમસઃ પરમ્ ।
બ્રહ્માનન્દં સદા પશ્યન્કથં બધ્યેત કર્મણા ॥ ૧૬॥

ત્રિધામસાક્ષિણં સત્યજ્ઞાનાનન્દાદિલક્ષણમ્ ।
ત્વમહંશબ્દલક્ષ્યાર્થમસક્તં સર્વદોષતઃ ॥ ૧૭॥

સર્વગં સચ્ચિદાત્માનં જ્ઞાનચક્ષુર્નિરીક્ષતે ।
અજ્ઞાનચક્ષુર્નેક્ષેત ભાસ્વન્તં ભાનુમન્ધવત્ ॥ ૧૮॥

પ્રજ્ઞાનમેવ તદ્બ્રહ્મ સત્યપ્રજ્ઞાલક્ષણમ્ ।
એવં બ્રહ્મપરિજ્ઞાનાદેવ મર્ત્યોઽમૃતો ભવેત્ ॥ ૧૯॥

તદ્બ્રહ્માનન્દમદ્વન્દ્વં નિર્ગુણં સત્યચિદ્ઘનમ્ ।
વિદિત્વા સ્વાત્મનો રૂપં ન બિભેતિ કુતશ્ચન ॥ ૨૦॥

ચિન્માત્રં સર્વગં નિત્યં સમ્પૂર્ણં સુખમદ્વયમ્ ।
સાક્ષાદ્બ્રહ્મૈવ નાન્યોઽસ્તીત્યેવં બ્રહ્મવિદાં સ્થિતિઃ ॥ ૨૧॥

અજ્ઞસ્ય દુઃખૌઘમયં જ્ઞસ્યાનન્દમયં જગત્ ।
અન્ધં ભુવનમન્ધસ્ય પ્રકાશં તુ સુચક્ષુષામ્ ॥ ૨૨॥

અનન્તે સચ્ચિદાનન્દે મયિ વારાહરૂપિણી ।
સ્થિતેઽદ્વિતીયભાવઃ સ્યાત્કો બન્ધઃ કશ્ચ મુચ્યતે ॥ ૨૩॥

સ્વસ્વરૂપં તુ ચિન્માત્રં સર્વદા સર્વદેહિનામ્ ।
નૈવ દેહાદિસઙ્ઘાતો ઘટવદ્દૃશિગોચરઃ ॥ ૨૪॥

સ્વાત્મનોઽન્યદિવાભાતં ચરાચરમિદં જગત્ ।
સ્વાત્મમાત્રતયા બુદ્ધ્વા તદસ્મીતિ વિભાવય ॥ ૨૫॥

સ્વસ્વરૂપં સ્વયં ભુઙ્ક્તે નાસ્તિ ભોજ્યં પૃથક્ સ્વતઃ ।
અસ્તિ ચેદસ્તિતારૂપં બ્રહ્મૈવાસ્તિત્વલક્ષણમ્ ॥ ૨૬॥

બ્રહ્મવિજ્ઞાનસમ્પન્નઃ પ્રતીતમખિલં જગત્ ।
પશ્યન્નપિ સદા નૈવ પશ્યતિ સ્વાત્મનઃ પૃથક્ ॥ ૨૭॥

મત્સ્વરૂપપરિજ્ઞાનાત્કર્મભિર્ન સ બધ્યતે ॥ ૨૮॥

યઃ શરીરેન્દ્રિયાદિભ્યો વિહીનં સર્વસાક્ષિણમ્ ।
પરમાર્થૈકવિજ્ઞાનં સુખાત્માનં સ્વયંપ્રભમ્ ॥ ૨૯॥

સ્વસ્વરૂપતયા સર્વં વેદ સ્વાનુભવેન યઃ ।
સ ધીરઃ સ તુ વિજ્ઞેયઃ સોઽહં તત્ત્વં ઋભો ભવ ॥ ૩૦॥

અતઃ પ્રપઞ્ચાનુભવઃ સદા ન હિ
    સ્વરૂપબોધાનુભવઃ સદા ખલુ ।
ઇતિ પ્રપશ્યન્પરિપૂર્ણવેદનો
    ન બન્ધમુક્તો ન ચ બદ્ધ એવ તુ ॥ ૩૧॥

સ્વસ્વરૂપાનુસન્ધાનાન્નૃત્યન્તં સર્વસાક્ષિણમ્ ।
મુહૂર્તં ચિન્તયેન્માં યઃ સર્વબન્ધૈઃ પ્રમુચ્યતે ॥ ૩૨॥

સર્વભૂતાન્તરસ્થાય નિત્યમુક્તચિદાત્મને ।
પ્રત્યક્ચૈતન્યરૂપાય મહ્યમેવ નમોનમઃ ॥ ૩૩॥

ત્વં વહમસ્મિ ભગવો દેવતેઽહં વૈ ત્વમસિ ।
તુભ્યં મહ્યમનન્તાય મહ્યં તુભ્યં ચિદાત્મને ॥ ૩૪॥

નમો મહ્યં પરેશાય નમસ્તુભ્યં શિવાય ચ ।
કિં કરોમિ ક્વ ગચ્છામિ કિં ગૃહ્ણામિ ત્યજામિ કિમ્ ॥ ૩૫॥

યન્મયા પૂરિતં વિશ્વં મહાકલ્પાંબુના યથા ।
અન્તઃસઙ્ગં બહિઃસઙ્ગમાત્મસઙ્ગં ચ યસ્ત્યજેત્ ।
સર્વસઙ્ગનિવૃત્તાત્મા સ મામેતિ ન સંશયઃ ॥ ૩૬॥

અહિરિવ જનયોગં સર્વદા વર્જયેદ્યઃ
    કુણપમિવ સુનારીં ત્યક્તુકામો વિરાગી ।
વિષમિવ વિષયાદીન્મન્યમાનો દુરન્તા-
    ઞ્જગતિ પરમહંસો વાસુદેવોઽહમેવ ॥ ૩૭॥

ઇદં સત્યમિદં સત્યં સત્યમેતદિહોચ્યતે ।
અહં સત્યં પરં બ્રહ્મ મત્તઃ કિઞ્ચિન્ન વિદ્યતે ॥ ૩૮॥

ઉપ સમીપે યો વાસો જીવાત્મપરમાત્મનોઃ ।
ઉપવાસઃ સ વિજ્ઞેયો ન તુ કાયસ્ય શોષણમ્ ॥ ૩૯॥

કાયશોષણમાત્રેણ કા તત્ર હ્યવિવેકિનામ્ ।
વલ્મીકતાડનાદેવ મૃતઃ કિં નુ મહોરગઃ ॥ ૪૦॥

અસ્તિ બ્રહ્મેતિ ચેદ્વેદ પરોક્ષજ્ઞાનમેવ તત્ ।
અહં બ્રહ્મેતિ ચેદ્વેદ સાક્ષાત્કારઃ સ ઉચ્યતે ॥ ૪૧॥

યસ્મિન્કાલે સ્વમાત્માનં યોગી જાનાતિ કેવલમ્ ।
તસ્માત્કાલાત્સમારભ્ય જીવન્મુક્તો ભવેદસૌ ॥ ૪૨॥

અહં બ્રહ્મેતિ નિયતં મોક્ષહેતુર્મહાત્મનામ્ ।
દ્વે પદે બન્ધમોક્ષાય નિર્મમેતિ મમેતિ ચ ॥ ૪૩॥

મમેતિ બધ્યતે જન્તુર્નિર્મમેતિ વિમુચ્યતે ।
બાહ્યચિન્તા ન કર્તવ્યા તથૈવાન્તરચિન્તિકા ।
સર્વચિન્તાં સમુત્સૃજ્ય સ્વસ્થો ભવ સદા ઋભો ॥ ૪૪॥

સઙ્કલ્પમાત્રકલનેન જગત્સમગ્રં
સઙ્કલ્પમાત્રકલને હિ જગદ્વિલાસઃ ।
સઙ્કલ્પમાત્રમિદમુત્સૃજ નિર્વિકલ્પ-
માશ્રિત્ય મામકપદં હૃદિ ભાવયસ્વ ॥ ૪૫॥

મચ્ચિન્તનં મત્કથનમન્યોન્યં મત્પ્રભાષણમ્ ।
મદેકપરમો ભૂત્વા કાલં નય મહામતે ॥ ૪૬॥

ચિદિહાસ્તીતિ ચિન્માત્રમિદં ચિન્મયમેવ ચ ।
ચિત્ત્વં ચિદહમેતે ચ લોકાશ્ચિદિતિ ભાવય ॥ ૪૭॥

રાગં નીરાગતાં નીત્વા નિર્લેપો ભવ સર્વદા ।
અજ્ઞાનજન્યકર્ત્રાદિકારકોત્પન્નકર્મણા ॥ ૪૮॥

શ્રુત્યુત્પન્નાત્મવિજ્ઞાનપ્રદીપો બાધ્યતે કથમ્ ।
અનાત્મનાં પરિત્યજ્ય નિર્વિકારો જગત્સ્થિતૌ ॥ ૪૯॥

એકનિષ્ઠતયાન્તસ્થસંવિન્માત્રપરો ભવ ।
ઘટાકાશમઠાકાશૌ મહાકાશે પ્રતિષ્ઠિતૌ ॥ ૫૦॥

એવં મયિ ચિદાકાશે જીવેશૌ પરિકલ્પિતૌ ।
યા ચ પ્રાગાત્મનો માયા તથાન્તે ચ તિરસ્કૃતા ॥ ૫૧॥

બ્રહ્મવાદિભિરુદ્ગીતા સા માયેતિ વિવેકતઃ ।
માયાતત્કાર્યવિલયે નેશ્વરત્વં ન જીવતા ॥ ૫૨॥

તતઃ શુદ્ધશ્ચિદેવાહં વ્યોમવન્નિરુપાધિકઃ ।

જીવેશ્વરાદિરૂપેણ ચેતનાચેતનાત્મકમ્ ॥ ૫૩॥

ઈક્ષણાદિપ્રવેશાન્તા સૃષ્ટિરીશેન કલ્પિતા ।
જાગ્રદાદિવિમોક્ષાન્તઃ સંસારો જીવકલ્પિતઃ ॥ ૫૪॥

ત્રિણાચિકાદિયોગાન્તા ઈશ્વરભ્રાન્તિમાશ્રિતાઃ ।
લોકાયતાદિસાઙ્ખ્યાન્તા જીવવિશ્રાન્તિમાશ્રિતાઃ ॥ ૫૫॥

તસ્માન્મુમુક્ષિભિર્નૈવ મતિર્જીવેશવાદયોઃ ।
કાર્યા કિન્તુ બ્રહ્મતત્ત્વં નિશ્ચલેન વિચાર્યતામ્ ॥ ૫૬।
અદ્વિતીયબ્રહ્મતત્ત્વં ન જાનન્તિ યથા તથા ।
ભ્રાન્તા એવાખિલાસ્તેષાં ક્વ મુક્તિઃ ક્વેહ વા સુખમ્ ॥ ૫૭॥

ઉત્તમાધમભાવશ્ચેત્તેષાં સ્યાદસ્તિ તેન કિમ્ ।
સ્વપ્નસ્થરાજ્યભિક્ષાભ્યાં પ્રબુદ્ધઃ સ્પૃશતે ખલુ ॥ ૫૮॥

અજ્ઞાને બુદ્ધિવિલયે નિદ્રા સા ભણ્યતે બુધૈઃ ।
વિલીનાજ્ઞાનતત્કાર્યે મયિ નિદ્રા કથં ભવેત્ ॥ ૫૯॥

બુદ્ધેઃ પૂર્ણવિકાસોઽયં જાગરઃ પરિકીર્ત્યતે ।
વિકારાદિવિહીનત્વાજ્જાગરો મે ન વિદ્યતે ॥ ૬૦॥

સૂક્ષ્મનાડિષુ સઞ્ચારો બુદ્ધેઃ સ્વપ્નઃ પ્રજાયતે ।
સઞ્ચારધર્મરહિતે મયિ સ્વપ્નો ન વિદ્યતે ॥ ૬૧॥

સુષુપ્તિકાલે સકલે વિલીને તમસાવૃતે ।
સ્વરૂપં મહદાનન્દં ભુઙ્ક્તે વિશ્વવિવર્જિતઃ ॥ ૬૨॥

અવિશેષેણ સર્વં તુ યઃ પશ્યતિ ચિદન્વયાત્ ।
સ એવ સાક્ષાદ્વિજ્ઞાની સ શિવઃ સ હરિર્વિધિઃ ॥ ૬૩॥

દીર્ઘસ્વપ્નમિદં યત્તદ્દીર્ઘં વા ચિત્તવિભ્રમમ્ ।
દીર્ઘં વાપિ મનોરાજ્યં સંસારં દુઃખસાગરમ્ ।
સુપ્તેરુત્થાય સુપ્ત્યન્તં બ્રહ્મૈકં પ્રવિચિન્ત્યતામ્ ॥ ૬૪॥

આરોપિતસ્ય જગતઃ પ્રવિલાપનેન
ચિત્તં મદાત્મકતયા પરિકલ્પિતં નઃ ।
શત્રૂન્નિહત્ય ગુરુષટ્કગણાન્નિપાતા-
દ્ગન્ધદ્વિપો ભવતિ કેવલમદ્વિતીયઃ ॥ ૬૫॥

અથાસ્તમેતુ વપુરાશશિતારમાસ્તાં
    કસ્તાવતાપિ મમ ચિદ્વપુષો વિશેષઃ ।
કુમ્ભે વિનશ્યતિ ચિરં સમવસ્થિતે વા
    કુમ્ભામ્બરસ્ય નહિ કોઽપિ વિશેષલેશઃ ॥ ૬૬॥

અહિનિર્લ્વયની સર્પનિર્મોકો જીવવર્જિતઃ ।
વલ્મીકે પતિતસ્તિષ્ઠેત્તં સર્પો નાભિમન્યતે ॥ ૬૭॥

એવં સ્થૂલં ચ સૂક્ષ્મં ચ શરીરં નાભિમન્યતે ।
પ્રત્યગ્જ્ઞાનશિખિધ્વસ્તે મિથ્યાજ્ઞાને સહેતુકે ।
નેતિ નેતીતિ રૂપત્વાદશરીરો ભવત્યયમ્ ॥ ૬૮॥

શાસ્ત્રેણ ન સ્યાત્પરમાર્થદૃષ્ટિઃ
    કાર્યક્ષમં પશ્યતિ ચાપરોક્ષમ્ ।
પ્રારબ્ધનાશાત્પ્રતિભાનનાશ
    એવં ત્રિધા નશ્યતિ ચાત્મમાયા ॥ ૬૯॥

બ્રહ્મત્વે યોજિતે સ્વામિગ્જીવભાવો ન ગચ્છતિ ।
અદ્વૈતે બોધિતે તત્ત્વે વાસના વિનિવર્તતે ॥ ૭૦॥

પ્રારબ્ધાન્તે દેહહાનિર્માયેતિ ક્ષીયતેઽખિલા ।
અસ્તીત્યુક્તે જગત્સર્વં સદ્રસં બ્રહ્મ તદ્ભવેત્ ॥ ૭૧॥

ભાતીત્યુક્તે જગત્સર્વં ભાનં બ્રહ્મૈવ કેવલમ્ ।
મરુભૂમૌ જલં સર્વં મરુભૂમાત્રમેવ તત્ ।
જગત્ત્રયમિદં સર્વં ચિન્માત્રં સ્વવિચારતઃ ॥ ૭૨॥

અજ્ઞાનમેવ ન કુતો જગતઃ પ્રસઙ્ગો
    જીવેશદેશિકવિકલ્પકથાતિદૂરે ।
એકાન્તકેવલચિદેકરસસ્વભાવે
    બ્રહ્મૈવ કેવલમહં પરિપૂર્ણમસ્મિ ॥ ૭૩॥

બોધચન્દ્રમસિ પૂર્ણવિગ્રહે
    મોહરાહુમુષિતાત્મતેજસિ ।
સ્નાનદાનયજનાદિકાઃ
    ક્રિયા મોચનાવધિ વૃથૈવ તિષ્ઠતે ॥ ૭૪॥

સલિલે સૈન્ધવં યદ્વત્સામ્યં ભવતિ યોગતઃ ।

તથાત્મમનસોરૈક્યં સમાધિરિતિ કથ્યતે ॥ ૭૫॥

દુર્લભો વિષયત્યાગો દુર્લભં તત્ત્વદર્શનમ્ ।
દુર્લભા સહજાવસ્થા સદ્ગુરોઃ કરુણાં વિના ॥ ૭૬॥

ઉત્પન્નશક્તિબોધસ્ય ત્યક્તનિઃશેષકર્મણઃ ।
યોગિનઃ સહજાવસ્થા સ્વયમેવ પ્રકાશતે ॥ ૭૭॥

રસસ્ય મનસશ્ચૈવ ચઞ્ચલત્વં સ્વભાવતઃ ।
રસો બદ્ધો મનો બદ્ધં કિં ન સિદ્ધ્યતિ ભૂતલે ॥ ૭૮॥

મૂર્ચ્છિતો હરતિ વ્યાધિં મૃતો જીવયતિ સ્વયમ્ ।
બદ્ધઃ ખેચરતાં ધત્તે બ્રહ્મત્વં રસચેતસિ ॥ ૭૯॥

ઇન્દ્રિયાણાં મનો નાથો મનોનાથસ્તુ મારુતઃ ।
મારુતસ્ય લયો નાથસ્તન્નાથં લયમાશ્રય ॥ ૮૦॥

નિશ્ચેષ્ટો નિર્વિકારશ્ચ લયો જીવતિ યોગિનામ્ ।
ઉચ્છિન્નસર્વસઙ્કલ્પો નિઃશેષાશેષચેષ્ટિતઃ ।
સ્વાવગમ્યો લયઃ કોઽપિ મનસાં વાગગોચરઃ ॥ ૮૧॥

પુઙ્ખાનુપુઙ્ખવિષયેક્ષણતત્પરોઽપિ
    બ્રહ્માવલોકનધિયં ન જહાતિ યોગી ।
સઙ્ગીતતાલલયવાદ્યવશં ગતાપિ
    મૌલિસ્થકુમ્ભપરિરક્ષણધીર્નટીવ ॥ ૮૨॥

સર્વચિન્તાં પરિત્યજ્ય સાવધાનેન ચેતસા ।
નાદ એવાનુસન્ધેયો યોગસામ્રાજ્યમિચ્છતા ॥ ૮૩॥

ઇતિ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

નહિ નાનાસ્વરૂપં સ્યાદેકં વસ્તુ કદાચન ।
તસ્માદખણ્ડ એવાસ્મિ યન્મદન્યન્ન કિઞ્ચન ॥ ૧॥

દૃશ્યતે શ્રૂયતે યદ્યદ્બ્રહ્મણોઽન્યન્ન તદ્ભવેત્ ।
નિત્યશુદ્ધ વિમુક્તૈકમખણ્ડાનન્દમદ્વયમ્ ।
સત્યં જ્ઞાનમનન્તં યત્પરં બ્રહ્માહમેવ તત્ ॥ ૨॥

આનન્દરૂપોઽહમખણ્ડબોધઃ
    પરાત્પરોઽહં ઘનચિત્પ્રકાશઃ ।

મેઘા યથા વ્યોમ ન ચ સ્પૃશન્તિ
    સંસારદુઃખાનિ ન માં સ્પૃશન્તિ ॥ ૩॥

સર્વં સુખં વિદ્ધિ સુદુઃખનાશા-
    ત્સર્વં ચ સદ્રૂપમસત્યનાશાત્ ।
ચિદ્રૂપમેવ પ્રતિભાનયુક્તં
    તસ્માદખણ્ડં મમ રૂપમેતત્ ॥ ૪॥

ન હિ જનિર્મરણં ગમનાગમૌ
    ન ચ મલં વિમલં ન ચ વેદનમ્ ।
ચિન્મયં હિ સકલં વિરાજતે
    સ્ફુટતરં પરમસ્ય તુ યોગિનઃ ॥ ૫॥

સત્યચિદ્ઘનમખણ્ડમદ્વયં
    સર્વદૃશ્યરહિતં નિરામયમ્ ।
યત્પદં વિમલમદ્વયં શિવં
    તત્સદાહમિતિ મૌનમાશ્રય ॥ ૬॥

જન્મમૃત્યુસુખદુઃખવર્જિતં
    જાતિનીતિકુલગોત્રદૂરગમ્ ।
ચિદ્વિવર્તજગતોઽસ્ય કારણં
    તત્સદાહમિતિ મૌનમાશ્રય ॥ ૭॥

પૂર્ણમદ્વયમખણ્ડચેતનં
    વિશ્વભેદકલનાદિવર્જિતમ્ ।
અદ્વિતીયપરસંવિદંશકં
    તત્સદાહમિતિ મૌનમાશ્રય ॥ ૮॥

કેનાપ્યબાધિતત્વેન ત્રિકાલેઽપ્યેકરૂપતઃ ।
વિદ્યમાનત્વમસ્ત્યેતત્સદ્રૂપત્વં સદા મમ ॥ ૯॥

નિરુપાધિકનિત્યં યત્સુપ્તૌ સર્વસુખાત્પરમ્ ।
સુખરૂપત્વમસ્ત્યેતદાનન્દત્વં સદા મમ ॥ ૧૦॥

દિનકરકિરણૈર્હિ શાર્વરં તમો
    નિબિડતરં ઝટિતિ પ્રણાશમેતિ ।
ઘનતરભવકારણં તમો યદ્-

હરિદિનકૃત્પ્રભયા ન ચાન્તરેણ ॥ ૧૧॥

મમ ચરણસ્મરણેન પૂજયા ચ
સ્વકતમસઃ પરિમુચ્યતે હિ જન્તુઃ ।
ન હિ મરણપ્રભવપ્રણાશહેતુ-
ર્મમ ચરણસ્મરણાદૃતેઽસ્તિ કિઞ્ચિત્ ॥ ૧૨॥

આદરેણ યથા સ્તૌતિ ધનવન્તં ધનેચ્છયા ।
તથા ચેદ્વિશ્વકર્તારં કો ન મુચ્યેત બન્ધનાત્ ॥ ૧૩॥

આદિત્યસન્નિધૌ લોકશ્ચેષ્ટતે સ્વયમેવ તુ ।
તથા મત્સન્નિધાવેવ સમસ્તં ચેષ્ટતે જગત્ ॥ ૧૪॥

શુક્તિકાયા યથા તારં કલ્પિતં માયયા તથા ।
મહદાદિ જગન્માયામયં મય્યેવ કેવલમ્ ॥ ૧૫॥

ચણ્ડાલદેહે પશ્વાદિસ્થાવરે બ્રહ્મવિગ્રહે ।
અન્યેષુ તારતમ્યેન સ્થિતેષુ ન તથા હ્યહમ્ ॥ ૧૬॥

વિનષ્ટદિગ્ભ્રમસ્યાપિ યથાપૂર્વં વિભાતિ દિક્ ।
તથા વિજ્ઞાનવિધ્વસ્તં જગન્મે ભાતિ તન્ન હિ ॥ ૧૭॥

ન દેહો નેન્દ્રિયપ્રાણો ન મનોબુદ્ધ્યહંકૃતિ ।
ન ચિત્તં નૈવ માયા ચ ન ચ વ્યોમાદિકં જગત્ ॥ ૧૮॥

ન કર્તા નૈવ ભોક્તા ચ ન ચ ભોજયિતા તથા ।
કેવલં ચિત્સદાનન્દબ્રહ્મૈવાહં જનાર્દનઃ ॥ ૧૯॥

જલસ્ય ચલનાદેવ ચઞ્ચલત્વં યથા રવેઃ ।
તથાહઙ્કારસમ્બધાદેવ સંસાર આત્મનઃ ॥ ૨૦॥

ચિત્તમૂલં હિ સંસારસ્તત્પ્રયત્નેન શોધયેત્ ।
હન્ત ચિત્તમહત્તાયાં કૈષા વિશ્વાસતા તવ ॥ ૨૧॥

ક્વ ધનાનિ મહીપાનાં બ્રહ્મણઃ ક્વ જગન્તિ વા ।
પ્રાક્તનાનિ પ્રયાતાનિ ગતાઃ સર્ગપરમ્પરઃ ।
કોટયો બ્રહ્મણાં યાતા ભૂપા નષ્ટાઃ પરાગવત્ ॥ ૨૨॥

સ ચાધ્યાત્માભિમાનોઽપિ વિદુષોઽયાસુરત્વતઃ ।
વિદુષોઽપ્યાસુરશ્ચેત્સ્યાન્નિષ્ફલં તત્ત્વદર્શનમ્ ॥ ૨૩॥

ઉત્પાદ્યમાના રાગાદ્યા વિવેકજ્ઞાનવહ્નિના ।
યદા તદૈવ દહ્યન્તે કુતસ્તેષાં પ્રરોહણમ્ ॥ ૨૪॥

યથા સુનિપુણઃ સમ્યક્ પરદોષેક્ષણે રતઃ ।
તથા ચેન્નિપુણઃ સ્વેષુ કો ન મુચ્યેત બન્ધનાત્ ॥ ૨૫॥

અનાત્મવિદમુક્તોઽપિ સિદ્ધિજાલાનિ વાઞ્છતિ ।
દ્રવ્યમન્ત્રક્રિયાકાલયુક્ત્યાપ્નોતિ મુનીશ્વર ॥ ૨૬॥

નાત્મજ્ઞસ્યૈષ વિષય આત્મજ્ઞો હ્યાત્મમાત્રદૃક્ ।
આત્મનાત્મનિ સન્તૃપ્તો નાવિદ્યામનુધાવતિ ॥ ૨૭॥

યે કેચન જગદ્ભાવાસ્તાનવિદ્યામયાન્વિદુઃ ।
કથં તેષુ કિલાત્મજ્ઞસ્ત્યક્તાવિદ્યો નિમજ્જતિ ॥ ૨૮॥

દ્રવ્યમન્ત્રક્રિયાકાલયુક્તયઃ સાધુસિદ્ધિદાઃ ।
પરમાત્મપદપ્રાપ્તૌ નોપકુર્વન્તિ કાશ્ચન ॥ ૨૯॥

સર્વેચ્છાકલનાશાન્તાવાત્મલાભોદયાભિધઃ ।
સ પુનઃ સિદ્ધિવાઞ્છાયાં કથમર્હત્યચિત્તતઃ ॥ ૩૦॥ ઇતિ॥

ઇતિ તૃતીયોધ્યાયઃ ॥ ૩॥

અથ હ ઋભું ભગવન્તં નિદાઘઃ પપ્રચ્છ જીવન્મુક્તિલક્ષણમનુબ્રૂહીતિ ।
તથેતિ સ હોવાચ । સપ્તભૂમિષુ જીવન્મુક્તાશ્ચત્વારઃ ।
શુભેચ્છા પ્રથમા ભૂમિકા ભવતિ । વિચારણા દ્વિતીયા । તનુમાનસી તૃતીયા ।
સત્ત્વાપત્તિસ્તુરીયા । અસંસક્તિઃ પઞ્ચમી । પદાર્થભાવના ષષ્ઠી । તુરીયગા સપ્તમી ।
પ્રણવાત્મિકા ભૂમિકા અકારોકારમકારાર્ધમાત્રાત્મિકા । સ્થૂલસૂક્ષ્મબીજસાક્ષિભેદેનાકારાદયશ્ચતુર્વિધાઃ ।
તદવસ્થા જાગ્રત્સ્વપ્નસુષુપ્તિતુરીયાઃ ।
અકારસ્થૂલાંશે જાગ્રદ્વિશ્વઃ ।
સૂક્ષ્માંશે તત્તૈજસઃ । બીજાંશે તત્પ્રાજ્ઞઃ । સાક્ષ્યંશે તત્તુરીયઃ ।
ઉકારસ્થૂલાંશે સ્વપ્નવિશ્વઃ ।
સૂક્ષ્માંશે તત્તૈજસઃ । બીજાંશે તત્પ્રાજ્ઞઃ । સાક્ષ્યંશે તત્તુરીયઃ ।
મકારસ્થૂલાંશે સુષુપ્તવિશ્વઃ ।
સૂક્ષ્માંશે તત્તૈજસઃ । બીજાંશે તત્પ્રાજ્ઞઃ । સાક્ષ્યંશે તત્તુરીયઃ ।
અર્ધમાત્રાસ્થૂલાંશે તુરીયવિશ્વઃ ।
સૂક્ષ્માંશે તત્તૈજસઃ । બીજાંશે તત્પ્રાજ્ઞઃ । સાક્ષ્યંશે તુરીયતુરીયઃ ।

અકારતુરીયાંશાઃ પ્રથમદ્વિતીયતૃતીયભૂમિકાઃ ।
ઉકારતુરીયાંશા ચતુર્થી ભૂમિકા ।
મકારતુરીયાંશા પઞ્ચમી ।
અર્ધમાત્રાતુરીયાંશા ષષ્ઠી ।
તદતીતા સપ્તમી ।
ભૂમિત્રયેષુ વિહરન્મુમુક્ષુર્ભવતિ ।
તુરીયભૂમ્યાં વિહરન્બ્રહ્મવિદ્ભવતિ ।
પઞ્ચમભૂમ્યાં વિહરન્બ્રહ્મવિદ્વરો ભવતિ ।
ષષ્ઠભૂમ્યાં વિહરન્બ્રહ્મવિદ્વરીયાન્ભવતિ ।
સપ્તમભૂમ્યાં વિહરન્બ્રહ્મવિદ્વરિષ્ઠો ભવતિ ।
તત્રૈતે શ્લોકા ભવન્તિ ।
જ્ઞાનભૂમિઃ શુભેચ્છા સ્યાત્પ્રથમા સમુદીરિતા ।
વિચારણા દ્વિતીયા તુ તૃતીયા તનુમાનસા ॥ ૧॥

સત્ત્વાપત્તિશ્ચતુર્થી સ્યાત્તતોઽસંસક્તિનામિકા ।
પદાર્થભાવના ષષ્ઠી સપ્તમી તુર્યગા સ્મૃતા ॥ ૨॥

સ્થિતઃ કિં મૂઢ એવાસ્મિ પ્રેક્ષ્યોઽહં શાસ્ત્રસજ્જનૈઃ ।
વૈરાગ્યપૂર્ણમિચ્છેતિ શુભેચ્છેત્યુચ્યતે બુધૈઃ ॥ ૩॥

શાસ્ત્રસજ્જનસમ્પર્કવૈરાગ્યાભ્યાસપૂર્વકમ્ ।
સદાચારપ્રવૃત્તિર્યા પ્રોચ્યતે સા વિચારણા ॥ ૪॥

વિચારણાશુભેચ્છાભ્યામિન્દ્રિયાર્થેષુ રક્તતા ।
યત્ર સા તનુતામેતિ પ્રોચ્યતે તનુમાનસી ॥ ૫॥

ભૂમિકાત્રિતયાભ્યાસાચ્ચિત્તેઽર્થવિરતેર્વશાત્ ।
સત્વાત્મનિ સ્થિતે શુદ્ધે સત્ત્વાપત્તિરુદાહૃતા ॥ ૬॥

દશાચતુષ્ટયાભ્યાસાદસંસર્ગફલા તુ યા ।
રૂઢસત્ત્વચમત્કારા પ્રોક્તા સંસક્તિનામિકા ॥ ૭॥

ભૂમિકાપઞ્ચકાભ્યાસાત્સ્વાત્મારામતયા ભૃશમ્ ।
આભ્યન્તરાણાં બાહ્યાનાં પદાર્થાનામભાવનાત્ ॥ ૮॥

પરપ્રયુક્તેન ચિરં પ્રત્યયેનાવબોધનમ્ ।
પદાર્થભાવનાનામ ષષ્ઠી ભવતિ ભૂમિકા ॥ ૯॥

ષડ્ભૂમિકાચિરાભ્યાસદ્ભેદસ્યાનુપલમ્ભનાત્ ।
યત્સ્વભાવૈકનિષ્ઠત્વં સા જ્ઞેયા તુર્યગા ગતિઃ ॥ ૧૦॥

શુભેચ્છાદિત્રયં ભૂમિભેદાભેદયુતં સ્મૃતમ્ ।
યથાવદ્વેદ બુદ્ધ્યેદં જગજ્જાગ્રતિ દૃશ્યતે ॥ ૧૧॥

અદ્વૈતે સ્થૈર્યમાયાતે દ્વૈતે ચ પ્રશમં ગતે ।
પશ્યન્તિ સ્વપ્નવલ્લોકં તુર્યભૂમિ સુયોગતઃ ॥ ૧૨॥

વિચ્છિન્નશરદભ્રાંશવિલયં પ્રવિલીયતે ।
સત્વાવશેષ એવાસ્તે હિ નિદાઘ દૃઢીકુરુ ॥ ૧૩॥

પઞ્ચભૂમિં સમારુહ્ય સુષુપ્તિપદનામિકામ્ ।
શાન્તાશેષવિશેષાંશસ્તિષ્ઠત્યદ્વૈતમાત્રકે ॥ ૧૪॥

અન્તર્મુખતયા નિત્યં બહિર્વૃત્તિપરોઽપિ સન્ ।
પરિશ્રાન્તતયા નિત્યં નિદ્રાલુરિવ લક્ષ્યતે ॥ ૧૫॥

કુર્વન્નભ્યાસમેતસ્યાં ભૂમ્યાં સમ્યગ્વિવાસનઃ ।
સપ્તમી ગાઢસુપ્તાખ્યા ક્રમપ્રાપ્તા પુરાતની ॥ ૧૬॥

યત્ર નાસન્ન સદ્રૂપો નાહં નાપ્યનહંકૃતિઃ ।
કેવલં ક્ષીણમનન આસ્તેઽદ્વૈતેઽતિનિર્ભયઃ ॥ ૧૭॥

અન્તઃશૂન્યો બહિઃશૂન્યઃ શૂન્યકુમ્ભ ઇવામ્બરે ।
અન્તઃપૂર્ણો બહિઃપૂર્ણઃ પૂર્ણકુમ્ભ ઇવાર્ણવે ॥ ૧૮॥

મા ભવ ગ્રાહ્યભાવાત્મા ગ્રાહકાત્મા ચ મા ભવ ।
ભાવનામખિલાં ત્યક્ત્વા યચ્છિષ્ટં તન્મયો ભવ ॥ ૧૯॥

દ્રષ્ટૃદર્શનદૃશ્યાનિ ત્યક્ત્વા વાસનયા સહ ।
દર્શનપ્રથમાભાસમાત્માનં કેવલં ભજ ॥ ૨૦॥

યથાસ્થિતમિદં યસ્ય વ્યવહારવતોઽપિ ચ ।
અસ્તઙ્ગતં સ્થિતં વ્યોમ સ જીવન્મુક્ત ઉચ્યતે ॥ ૨૧॥

નોદેતિ નાસ્તમાયાતિ સુખે દુઃખે મનઃપ્રભા ।
યથાપ્રાપ્તસ્થિતિર્યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૨૨॥

યો જાગર્તિ સુષુપ્તિસ્થો યસ્ય જાગ્રન્ન વિદ્યતે ।
યસ્ય નિર્વાસનો બોધઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૨૩॥

રાગદ્વેષભયાદીનામનુરૂપં ચરન્નપિ ।
યોઽન્તર્વ્યોમવદચ્છન્નઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૨૪॥

યસ્ય નાહંકૃતો ભાવો બુદ્ધિર્યસ્ય ન લિપ્યતે ।
કુર્વતોઽકુર્વતો વાપિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૨૫॥

યસ્માન્નોદ્વિજતે લોકો લોકાન્નોદ્વિજતે ચ યઃ ।
હર્ષામર્ષભયોન્મુક્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૨૬॥

યઃ સમસ્તાર્થજાલેષુ વ્યવહાર્યપિ શીતલઃ ।
પરાર્થેષ્વિવ પૂર્ણાત્મા સ જીવન્મુક્ત ઉચ્યતે ॥ ૨૭॥

પ્રજહાતિ યદા કામાન્સર્વાંશ્ચિત્તગતાન્મુને ।
મયિ સર્વાત્મકે તુષ્ટઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૨૮॥

ચૈત્યવર્જિતચિન્માત્રે પદે પરમપાવને ।
અક્ષુબ્ધચિત્તો વિશ્રાન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૨૯॥

ઇદં જગદહં સોઽયં દૃશ્યજાતમવાસ્તવમ્ ।
યસ્ય ચિત્તે ન સ્ફુરતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૩૦॥

સદ્બ્રહ્મણિ સ્થિરે સ્ફારે પૂર્ણે વિષયવર્જિતે ।
આચાર્યશાસ્ત્રમાર્ગેણ પ્રવિશ્યાશુ સ્થિરો ભવ ॥ ૩૧॥

શિવો ગુરુઃ શિવો વેદઃ શિવ દેવઃ શિવઃ પ્રભુઃ ।
શિવોઽસ્મ્યહં શિવઃ સર્વં શિવદન્યન્ન કિઞ્ચન ॥ ૩૨॥

તમેવ ધીરો વિજ્ઞાય પ્રજ્ઞાં કુર્વીત બ્રાહ્મણઃ ।
નાનુધ્યાયાદ્બહૂઞ્છબ્દાન્વાચો વિગ્લાપનં હિ તત્ ॥ ૩૩॥

શુકો મુક્તો વામદેવોઽપિ મુક્ત-
  સ્તાભ્યાં વિના મુક્તિભાજો ન સન્તિ ।
શુકમાર્ગં યેઽનુસરન્તિ ધીરાઃ
  સદ્યો મુક્તાસ્તે ભવન્તીહ લોકે ॥ ૩૪॥

વામદેવં યેઽનુસરન્તિ નિત્યં
  મૃત્વા જનિત્વા ચ પુનઃપુનસ્તત્ ।
તે વૈ લોકે ક્રમમુક્તા ભવન્તિ

યોગૈઃ સાઙ્ખ્યૈઃ કર્મભિઃ સત્ત્વયુક્તૈઃ ॥ ૩૫॥

શુકશ્ચ વામદેવશ્ચ દ્વે સૃતી દેવનિર્મિતે ।
શુકઃ વિહઙ્ગમઃ પ્રોક્તો વામદેવઃ પિપીલિકા ॥ ૩૬॥

અતદ્વ્યાવૃત્તિરૂપેણ સાક્ષાદ્વિધિમુખેન વા ।
મહાવાક્યવિચારેણ સાઙ્ખ્યયોગસમાધિના ॥ ૩૭॥

વિદિત્વા સ્વાત્મનો રૂપં સમ્પ્રજ્ઞાતસમાધિતઃ ।
શુકમાર્ગેણ વિરજાઃ પ્રયાન્તિ પરમં પદમ્ ॥ ૩૮॥

યમાદ્યાસનજાયાસહઠાભ્યાસાત્પુનઃપુનઃ ।
વિઘ્નબાહુલ્યસઞ્જાત અણિમાદિવશાદિહ ॥ ૩૯॥

અલબ્ધ્વાપિ ફલં સમ્યક્પુનર્ભૂત્વા મહાકુલે ।
પુનર્વાસનયૈવાયં યોગાભ્યાસં પુનશ્ચરન્ ॥ ૪૦॥

અનેકજન્માભ્યાસેન વામદેવેન વૈ પથા ।
સોઽપિ મુક્તિં સમાપ્નોતિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૪૧॥

દ્વાવિમાવપિ પન્થાનૌ બ્રહ્મપ્રાપ્તિકરૌ શિવૌ ।
સદ્યોમુક્તિપ્રદશ્ચૈકઃ ક્રમમુક્તિપ્રદઃ પરઃ ।
અત્ર કો મોહઃ કઃ શોક એકત્વમનુપશ્યતઃ ॥ ૪૨॥

યસ્યાનુભવપર્યન્તા બુદ્ધિસ્તત્ત્વે પ્રવર્તતે ।
તદ્દૃષ્ટિગોચરાઃ સર્વે મુચ્યન્તે સર્વપાતકૈઃ ॥ ૪૩॥

ખેચરા ભૂચરાઃ સર્વે બ્રહ્મવિદ્દૃષ્ટિગોચરાઃ ।
સદ્ય એવ વિમુચ્યન્તે કોટિજન્માર્જિતૈરઘૈઃ ॥ ૪૪॥ ઇતિ॥

ઇતિ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

અથ હૈનં ઋભું ભગવન્તં નિદાઘઃ પપ્રચ્છ
યોગાભ્યાસવિધિમનુબ્રૂહીતિ । તથેતિ સ હોવાચ ।
પઞ્ચભૂતાત્મકો દેહઃ પઞ્ચમણ્ડલપૂરિતઃ ।
કાઠિન્યં પૃથિવીમેકા પાનીયં તદ્દ્રવાકૃતિ ॥ ૧॥

દીપનં ચ ભવેત્તેજઃ પ્રચારો વાયુલક્ષણમ્ ।
આકાશઃ સત્ત્વતઃ સર્વં જ્ઞાતવ્યં યોગમિચ્છતા ॥ ૨॥

ષટ્શતાન્યધિકાન્યત્ર સહસ્રાણ્યેકવિંશતિઃ ।

અહોરાત્રવહિઃ શ્વાસૈર્વાયુમણ્ડલઘાતતઃ ॥ ૩॥

તત્પૃથ્વીમણ્ડલે ક્ષીણે વલિરાયાતિ દેહિનામ્ ।
તદ્વદાપો ગણાપાયે કેશાઃ સ્યુઃ પાણ્ડુરાઃ ક્રમાત્ ॥ ૪॥

તેજઃક્ષયે ક્ષુધા કાન્તિર્નશ્યતે મારુતક્ષયે ।
વેપથુઃ સંભવેન્નિત્યં નામ્ભસેનૈવ જીવતિ ॥ ૫॥

ઇત્થંભૂતં ક્ષયાન્નિત્યં જીવિતં ભૂતધારણમ્ ।
ઉડ્યાણં કુરુતે યસ્માદવિશ્રાન્તં મહાખગઃ ॥ ૬॥

ઉડ્ડિયાણં તદેવ સ્યાત્તત્ર બન્ધોઽભિધીયતે ।
ઉડ્ડિયાણો હ્યસૌ બન્ધો મૃત્યુમાતઙ્ગકેશરી ॥ ૭॥

તસ્ય મુક્તિસ્તનોઃ કાયાત્તસ્ય બન્ધો હિ દુષ્કરઃ ।
અગ્નૌ તુ ચાલિતે કુક્ષૌ વેદના જાયતે ભૃશમ્ ॥ ૮॥

ન કાર્યા ક્ષુધિ તેનાપિ નાપિ વિણ્મૂત્રવેગિના ।
હિતં મિતં ચ ભોક્તવ્યં સ્તોકં સ્તોકમનેકધા ॥ ૯॥

મૃદુમધ્યમમન્ત્રેષુ ક્રમાન્મન્ત્રં લયં હઠમ્ ।
લયમન્ત્રહઠા યોગા યોગો હ્યષ્ટાઙ્ગસંયુતઃ ॥ ૧૦॥

યમશ્ચ નિયમશ્ચૈવ તથા ચાસનમેવ ચ ।
પ્રાણાયમસ્તથા પશ્ચાત્પ્રત્યાહારસ્તથા પરમ્ ॥ ૧૧॥

ધારણા ચ તથા ધ્યાનં સમધિશ્ચાષ્ટમો ભવેત્ ।
અહિંસા સત્યમસ્તેયં બ્રહ્મચર્યં દયાર્જવમ્ ॥ ૧૨॥

ક્ષમા ધૃતિર્મિતાહારઃ શૌચં ચેતિ યમા દશ ।
તપઃ સન્તોષમાસ્તિક્યં દાનમીશ્વરપૂજનમ્ ॥ ૧૩॥

સિદ્ધાન્તશ્રવણં ચૈવ હ્રીર્મતિશ્ચ જપો વ્રતમ્ ।
એતે હિ નિયમાઃ પ્રોક્તા દશધૈવ મહામતે ॥ ૧૪॥

એકાદશાસનાનિ સ્યુશ્ચક્રાદિ મુનિસત્તમ ।
ચક્રં પદ્માસનં કૂર્મં મયૂરં કુક્કુટં તથા ॥ ૧૫॥

વીરાસનં સ્વસ્તિકં ચ ભદ્રં સિંહાસનં તથા ।
મુક્તાસનં ગોમુખં ચ કીર્તિતં યોગવિત્તમૈઃ ॥ ૧૬॥

સવ્યોરુ દક્ષિણે ગુલ્ફે દક્ષિણં દક્ષિણેતરે ।
નિદધ્યાદૃજુકાયસ્તુ ચક્રાસનમિદં મતમ્ ॥ ૧૭॥

પૂરકઃ કુમ્ભકસ્તદ્વદ્રેચકઃ પૂરકઃ પુનઃ ।
પ્રાણાયામઃ સ્વનાડીભિસ્તસ્માન્નાડીઃ પ્રચક્ષતે ॥ ૧૮॥

શરીરં સર્વજન્તૂનાં ષણ્ણવત્યઙ્ગુલાત્મકમ્ ।
તન્મધ્યે પાયુદેશાત્તુ દ્વ્યઙ્ગુલાત્પરતઃ પરમ્ ॥ ૧૯॥

મેઢ્રદેશાદધસ્તાત્તુ દ્વ્યઙ્ગુલાન્મધ્યમુચ્યતે ।
મેઢ્રાન્નવાઙ્ગુલાદૂર્ધ્વં નાડીનાં કન્દમુચ્યતે ॥ ૨૦॥

ચતુરઙ્ગુલમુત્સેધં ચતુરઙ્ગુલમાયતમ્ ।
અણ્ડાકારં પરિવૃતં મેદોમજ્જાસ્થિશોણિતૈઃ ॥ ૨૧॥

તત્રૈવ નાડીચક્રં તુ દ્વાદશારં પ્રતિષ્ઠિતમ્ ।
શરીરં ધ્રિયતે યેન વર્તતે તત્ર કુણ્ડલી ॥ ૨૨॥

બ્રહ્મરન્ધ્રં સુષુમ્ણા યા વદનેન પિધાય સા ।
અલમ્બુસા સુષુમ્ણાયાઃ કુહૂર્નાડી વસત્યસૌ ॥ ૨૩॥

અનન્તરારયુગ્મે તુ વારુણા ચ યશસ્વિની ।
દક્ષિણારે સુષુમ્ણાયાઃ પિઙ્ગલા વર્તતે ક્રમાત્ ॥ ૨૪॥

તદન્તરારયોઃ પૂષા વર્તતે ચ પયસ્વિની ।
સુષુમ્ના પશ્ચિમે ચારે સ્થિતા નાડી સરસ્વતી ॥ ૨૫॥

શઙ્ખિની ચૈવ ગાન્ધારી તદનન્તરયોઃ સ્થિતે ।
ઉત્તરે તુ સુષુમ્નાયા ઇડાખ્યા નિવસત્યસૌ ॥ ૨૬॥

અનન્તરં હસ્તિજિહ્વા તતો વિશ્વોદરી સ્થિતા ।
પ્રદક્ષિણક્રમેણૈવ ચક્રસ્યારેષુ નાડયઃ ॥ ૨૭॥

વર્તન્તે દ્વાદશ હ્યેતા દ્વાદશાનિલવાહકાઃ ।
પટવત્સંસ્થિતા નાડ્યો નાનાવર્ણાઃ સમીરિતાઃ ॥ ૨૮॥

પટમધ્યં તુ યત્સ્થાનં નાભિચક્રં તદુચ્યતે ।
નાદાધારા સમાખ્યાતા જ્વલન્તી નાદરૂપિણી ॥ ૨૯॥

પરરન્ધ્રા સુષુમ્ના ચ ચત્વારો રત્નપૂરિતાઃ ।
કુણ્ડલ્યા પિહિતં શશ્વદ્બ્રહ્મરન્ધ્રસ્ય મધ્યમમ્ ॥ ૩૦॥

એવમેતાસુ નાડીષુ ધરન્તિ દશવાયવઃ ।
એવં નાડીગતિં વાયુગતિં જ્ઞાત્વા વિચક્ષણઃ ॥ ૩૧॥

સમગ્રીવશિરઃ કાયઃ સંવૃતાસ્યઃ સુનિશ્ચલઃ ।
નાસાગ્રે ચૈવ હૃન્મધ્યે બિન્દુમધ્યે તુરીયકમ્ ॥ ૩૨॥

સ્રવન્તમમૃતં પશ્યેન્નેત્રાભ્યાં સુસમાહિતઃ ।
અપાનં મુકુલીકૃત્ય પાયુમાકૃષ્ય ચોન્મુખમ્ ॥ ૩૩॥

પ્રણવેન સમુત્થાપ્ય શ્રીબીજેન નિવર્તયેત્ ।
સ્વાત્માનં ચ શ્રિયં ધ્યાયેદમૃતપ્લાવનં તથા ॥ ૩૪॥

કાલવઞ્ચનમેતદ્ધિ સર્વમુખ્યં પ્રચક્ષતે ।
મનસા ચિન્તિતા કાર્યં મનસા યેન સિધ્યતિ ॥ ૩૫॥

જલેઽગ્નિજ્વલનાચ્છાખાપલ્લવાનિ ભવન્તિ હિ ।
નાધન્યં જાગતં વાક્યં વિપરીતા ભવેત્ક્રિયા ॥ ૩૬॥

માર્ગે બિન્દું સમાબધ્ય વહ્નિં પ્રજ્વાલ્ય જીવને ।
શોષયિત્વા તુ સલિલં તેન કાયં દૃઢં ભવેત્ ॥ ૩૭॥

ગુદયોનિસમાયુક્ત આકુઞ્ચત્યેકકાલતઃ ।
અપાનમૂર્ધ્વગં કૃત્વા સમાનોન્ને નિયોજયેત્ ॥ ૩૮॥

સ્વાત્માનં ચ શ્રિયં ધ્યાયેદમૃતપ્લાવનં તતઃ ।
બલં સમારભેદ્યોગં મધ્યમદ્વારભાગતઃ ॥ ૩૯॥

ભાવયેદૂર્ધ્વગત્યર્થં પ્રાણાપાનસુયોગતઃ ।
એષ યોગો વરો દેહે સિદ્ધિમાર્ગપ્રકાશકઃ ॥ ૪૦॥

યથૈવાપાઙ્ગતઃ સેતુઃ પ્રવાહસ્ય નિરોધકઃ ।
તથા શરીરગા ચ્છાયા જ્ઞાતવ્યા યોગિભિઃ સદા ॥ ૪૧॥

સર્વાસામેવ નાડીનામેષ બન્ધઃ પ્રકીર્તિતઃ ।
બન્ધસ્યાસ્ય પ્રસાદેન સ્ફુટીભવતિ દેવતા ॥ ૪૨॥

એવં ચતુષ્પથો બન્ધો માર્ગત્રયનિરોધકઃ ।
એકં વિકાસયન્માર્ગં યેન સિદ્ધાઃ સુસઙ્ગતાઃ ॥ ૪૩॥

ઉદાનમૂર્ધ્વગં કૃત્વા પ્રાણેન સહ વેગતઃ ।

બન્ધોઽયં સર્વનાડીનામૂર્ધ્વં યાતિ નિરોધકઃ ॥ ૪૪॥

અયં ચ સમ્પુટો યોગો મૂલબન્ધોઽપ્યયં મતઃ ।
બન્ધત્રયમનેનૈવ સિદ્ધ્યત્યભ્યાસયોગતઃ ॥ ૪૫॥

દિવારાત્રમવિચ્છિન્નં યામેયામે યદા યદા ।
અનેનાભ્યાસયોગેન વાયુરભ્યસિતો ભવેત્ ॥ ૪૬॥

વાયાવભ્યસિતે વહ્નિઃ પ્રત્યહં વર્ધતે તનૌ ।
વહ્નૌ વિવર્ધમાને તુ સુખમન્નાદિ જીર્યતે ॥ ૪૭॥

અન્નસ્ય પરિપાકેન રસવૃદ્ધિઃ પ્રજાયતે ।
રસે વૃદ્ધિં ગતે નિત્યં વર્ધન્તે ધાતવસ્તથા ॥ ૪૮॥

ધાતૂનાં વર્ધનેનૈવ પ્રબોધો વર્તતે તનૌ ।
દહ્યન્તે સર્વપાપાનિ જન્મકોટ્યર્જિતાનિ ચ ॥ ૪૯॥

ગુદમેઢ્રાન્તરાલસ્થં મૂલાધારં ત્રિકોણકમ્ ।
શિવસ્ય બિન્દુરૂપસ્ય સ્થાનં તદ્ધિ પ્રકાશકમ્ ॥ ૫૦॥

યત્ર કુણ્ડલિની નામ પરા શક્તિઃ પ્રતિષ્ઠિતા ।
યસ્માદુત્પદ્યતે વાયુર્યસ્માદ્વહ્નિઃ પ્રવર્ધતે ॥ ૫૧॥

યસ્માદુત્પદ્યતે બિન્દુર્યસ્માન્નાદઃ પ્રવર્ધતે ।
યસ્માદુત્પદ્યતે હંસો યસ્માદુત્પદ્યતે મનઃ ॥ ૫૨॥

મૂલાધારાદિષટ્ચક્રં શક્તિસ્થાનમુદીરિતમ્ ।
કણ્ઠાદુપરિ મૂર્ધાન્તં શાંભવં સ્થાનમુચ્યતે ॥ ૫૩॥

નાડીનામાશ્રયઃ પિણ્ડો નાડ્યઃ પ્રાણસ્ય ચાશ્રયઃ ।
જીવસ્ય નિલયઃ પ્રાણો જીવો હંસસ્ય ચાશ્રયઃ ॥ ૫૪॥

હંસઃ શક્તેરધિષ્ઠાનં ચરાચરમિદં જગત્ ।
નિર્વિકલ્પઃ પ્રસન્નાત્મા પ્રાણાયાં સમભ્યસેત્ ॥ ૫૫॥

સમ્યગ્બન્ધત્રયસ્થોઽપિ લક્ષ્યલક્ષણકારણમ્ ।
વેદ્યં સમુદ્ધરેન્નિત્યં સત્યસન્ધાનમાનસઃ ॥ ૫૬॥

રેચકં પૂરકં ચૈવ કુમ્ભમધ્યે નિરોધયેત્ ।
દૃશ્યમાને પરે લક્ષ્યે બ્રહ્મણિ સ્વયમાશ્રિતઃ ॥ ૫૭॥

બાહ્યસ્થવિષયં સર્વં રેચકઃ સમુદાહૃતઃ ।
પૂરકં શાસ્ત્રવિજ્ઞાનં કુમ્ભકં સ્વગતં સ્મૃતમ્ ॥ ૫૮॥

એવમભ્યાસચિત્તશ્ચેત્સમુક્તો નાત્ર સંશયઃ ।
કુમ્ભકેન સમારોપ્ય કુમ્ભકેન પૂરયેત્ ॥ ૫૯॥

કુમ્ભેન કુમ્ભયેત્કુમ્ભં તદન્તસ્થઃ પરં શિવમ્ ।
પુનરાસ્ફાલયેદદ્ય સુસ્થિરં કણ્ઠમુદ્રયા ॥ ૬૦॥

વાયૂનાં ગતિમાવૃત્ય ધૃત્વા પૂરકકુમ્ભકૌ ।
સમહસ્તયુગં ભૂમૌ સમં પાદયુગં તથા ॥ ૬૧॥

વેધકક્રમયોગેન ચતુષ્પીઠં તુ વાયુના ।
આસ્ફાલયેન્મહામેરું વાયુવક્ત્રે પ્રકોટિભિઃ ॥ ૬૨॥

પુટદ્વયં સમાકૃષ્ય વાયુઃ સ્ફુરતિ સત્વરમ્ ।
સોમસૂર્યાગ્નિસંબધાજ્જાનીયાદમૃતાય વૈ ॥ ૬૩॥

મેરુમધ્યગતા દેવાશ્ચલન્તે મેરુચાલનાત્ ।
આદૌ સઞ્જાયતે ક્ષિપ્રં વેધોઽસ્ય બ્રહ્મગ્રન્થિતઃ ॥ ૬૪॥

બ્રહ્મગ્રન્થિં તતો ભિત્ત્વા વિષ્ણુગ્રન્થિં ભિનત્ત્યસૌ ।
વિષ્ણુગ્રન્થિં તતો ભિત્ત્વા રુદ્રગ્રન્થિં ભિનત્ત્યસૌ ॥ ૬૫॥

રુદ્રગ્રન્થિં તતો ભિત્ત્વા છિત્વા મોહમલં તથા ।
અનેકજન્મસંસ્કારગુરુદેવપ્રસાદતઃ ॥ ૬૬॥

યોગાભ્યાસાત્તતો વેધો જાયતે તસ્ય યોગિનઃ ।
ઇડાપિઙ્ગલયોર્મધ્યે સુષુમ્નાનાડિમણ્ડલે ॥ ૬૭॥

મુદ્રાબન્ધવિશેષેણ વાયુમૂર્ધ્વં ચ કારયેત્ ।
ૠ્હસ્વો દહતિ પાપાનિ દીર્ઘો મોક્ષપ્રદાયકઃ ॥ ૬૮॥

આપ્યાયનઃ પ્લુતો વાપિ ત્રિવિધોચ્ચારણેન તુ ।
તૈલધારામિવચ્છિન્નં દીર્ઘઘણ્ટાનિનાદવત્ ॥ ૬૯॥

અવાચ્યં પ્રણવસ્યાગ્રં યસ્તં વેદ સ વેદવિત્ ।
ૠ્હસ્વં બિન્દુગતં દૈર્ઘ્યં બ્રહ્મરન્ધ્રગતં પ્લુતમ્ ।
દ્વાદશાન્તગતં મન્ત્રં પ્રસાદં મન્ત્રસિદ્ધયે ॥ ૭૦
સર્વવિઘ્નહરશ્ચાયં પ્રણવઃ સર્વદોષહા ।

આરંભશ્ચ ઘટશ્ચૈવ પુનઃ પરિચયસ્તથા ॥ ૭૧॥

નિષ્પત્તિશ્ચેતિ કથિતાશ્ચતસ્રસ્તસ્ય ભૂમિકાઃ ।
કારણત્રયસંભૂતં બાહ્યં કર્મ પરિત્યજન્ ॥ ૭૨॥

આન્તરં કર્મ કુરુતે યત્રારંભઃ સ ઉચ્યતે ।
વાયુઃ પશ્ચિમતો વેધં કુર્વન્નાપૂર્ય સુસ્થિરમ્ ॥ ૭૩॥

યત્ર તિષ્ઠતિ સા પ્રોક્તા ઘટાખ્યા ભૂમિકા બુધૈઃ ।
ન સજીવો ન નિર્જીવઃ કાયે તિષ્ઠતિ નિશ્ચલમ્ ।
યત્ર વાયુઃ સ્થિરઃ ખે સ્યાત્સેયં પ્રથમભૂમિકા ॥ ૭૪॥

યત્રાત્મના સૃષ્ટિલયૌ જીવન્મુક્તિદશાગતઃ ।
સહજઃ કુરુતે યોગં સેયં નિષ્પત્તિભૂમિકા ॥ ૭૫॥ ઇતિ॥

એતદુપનિષદં યોઽધીતે સોઽગ્નિપૂતો ભવતિ ।
સ વાયુપૂતો ભવતિ । સુરાપાનાત્પૂતો ભવતિ ।
સ્વર્ણસ્તેયાત્પૂતો ભવતિ । સ જીવન્મુક્તો ભવતિ ।
તદેતદૃચાભ્યુક્તમ્ । તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ ।
દિવીવ ચક્ષુરાતતમ્ । તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે ।
વિષ્ણોર્યત્પરમં પદમિત્યુપનિષત્ ॥

ઇતિ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

ૐ સહ નાવવતુ સહ નૌ ભુનક્તુ સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધી તમસ્તુ મા વિદ્વિષાવહૈ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

ઇતિ વરાહોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*Varaha Upanishad*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*